# Rashtra Sandeshah

# રાષ્ટ્રસન્દેશઃ

## Document Information

Text title : Rashtra Sandeshah

File name : rAShTrasandeshaH.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : Kapiladeva Dwivedi

Proofread by : Mandar Mali

Translated by : Mandar Mali

Description/comments : Rashtragitanjali, Kapiladeva Dwivedi (Ed.)

Acknowledge-Permission: Kapiladeva Dwivedi, Vishvabharati Anusandhan Parishad, Varanasi

Latest update : May 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# રાષ્ટ્રસન્દેશઃ

(ગીતિકા) (પ્રમાણિકા વૃત્તમ્)

વિકાસતાં પ્રકાશતાં
    સ્વદેશ એષ રાજતામ્ ।
જ્વલત્પ્રતાપ-રોચિષાં
    દિગન્ત-વ્યાપ્ત-કીર્તિભાક્ ॥ વિકાસતા૦॥

સ્ફુરદ્-દહત્ ત્વિષા દહેદ્,
    અરાતિ-વૃન્દ-વાહિનીમ્ ।
સ્વતન્ત્ર દેશ-ભારતો
    વિભા-રતો વિભાસતામ્ ॥ વિકાસતા૦॥

ધરા પ્રપીડિતા રુપા,
    સમસ્ત-આઇગ્લ શાસકૈઃ ।
હૃતા મૃતેવ ચોજ્ઝિતા
    ન સાન્ત્વના-ધ્વનિ શ્રુતઃ ॥ વિકાસતા૦॥

વિદેશ-ચોર-લુણ્ઠકૈઃ,
    ચિરાય તાપિતા મહી ।
સ્વદેશ-વીરમાત્મજઃ
    સ્વ-રક્ષણં પ્રયાચતે ॥ વિકાસતા૦॥

નહીદૃશઃ ક્વચિત્ સુખં
    યથા સ્વમાતૃ-તર્પણમ્ ।
સ્વમાતૃભૂમિ રક્ષણં
    સ્વદેશ શક્તિપોષણમ્ ॥ વિકાસતા૦॥

સ્વદેશ-બન્ધુ પોષણં
    સ્વ-રાષ્ટ્ર-શત્રુ-શોષણમ્ ।
સ્વમાતૃભૂમિ-તોષણં

    સદા સુખં મુદાવહમ્ ॥ વિકસતા૦॥

યદીષ્ટમાત્મ ગૌરવં

    સ્વદેશ-માન-રક્ષણમ્ ।

સ્વદેશ-કેતુ-સારણં

    તદા ભજસ્વ માતરમ્ ॥ વિકાસતા૦॥

ઉપાસ્ય ક્રાન્તિ-પદ્ધતિં

    અપાસ્ય દોષ-સંહતિમ્ ।

નિરસ્ય દૈન્ય-દાનવીં

    સૃતિં શ્રયસ્વ માનવીમ્ ॥ વિકાસતા૦॥

શ્રમાશ્રયા સૃતિ શુભા

    ગુણાવહા મતિ શુભા ।

ગતિ શુભા સુખાવહા

    કૃતિ શુભા મુદાવહા ॥ વિકાસતા૦॥

સ્વ-જીવનં સમર્પ્યતાં

    સ્વમાતરં ચ રક્ષ્યતામ્ ।

સ્વ-ભારતં પ્રપોષ્યતાં

    હુતાત્મનશ્ચ તોષ્યતામ્ ॥ વિકાસતા૦॥

Proofread by Mandar Mali

*Rashtra Sandeshah*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*